(“मलिनिमालिनि माधवयोर्धितम्”।
इति माघः।) वृश्चिकः। इति मेदिनी॥

अलीकं, क्ली, (अल+ईकन्।) अप्रियं। (“तद्यथा स महाराजो नालीकमधिगच्छति”। इति रामायणे।) मिथ्या। इत्यमरः॥ (“ज्ञातेऽलीकनिमीलिते नयनयोः”। इति अमरुशतके।) स्वर्गः। इति मेदिनी॥ ललाटं। इति हेमचन्द्रः॥

अलीकः, त्रि, (अल+ईकन्।) मिथ्या। अप्रियं। अल्पं। इति शब्दरत्नावली॥

अलीकमत्स्यः, पुं, अङ्गारखिन्नतिलतैलभ्रष्टमाषपिष्टं। तत्र प्रमाणं राजनिर्घण्टे यथा।
“माषपिष्टिकया लिप्तनागवल्लीदलैर्महत्।
तत्तु संस्वेदयेद्युक्त्या स्थाल्यामङ्गारकोपरि॥
ततो निष्काशितं खण्डं तिलतैलेन भर्ज्जयेत्।
अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः॥
तं वन्ताकभटित्रेण वास्तूकेन च भक्षयेत्॥”

अलुः, स्त्री, (अल+उन्।) आलुः। क्षुद्रकलसी। इत्यमरटीकायां रमानाथः॥

अलुब्धः, त्रि, (लुभ+क्तः, नञ्समासः।) लोभरहितः। यथा मनुः।
“एकोऽप्यलुब्धः साक्षी स्यात् बह्व्यः शुच्योऽपि न स्त्रियः। स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः”॥
“एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः।” इति व्यवहारतत्त्वं॥
(“अलुब्धैः स्निग्धैः प्रबुद्धैरमात्यैः परिवृतः”। इति कादम्बरी।)

अले, अ, पिशाचभाषया सम्बोधनं। इति शब्दरत्नावली॥

अलेले, अ, पिशाचभाषया सम्बोधनं। इति शब्दरत्नावली॥

अलोभः, पुं, (न लोभः, अभावे नञ्।) लोभाभावः। यथा,—
“इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृतः”॥
इति महाभारतं॥

अलोभी, [न्] त्रि, (लोभोऽस्त्यस्य इति लोभी, न लोभी इति नञ्समासः।) लोभशून्यव्यक्तिः। नास्ति लोभो यस्य इति बहुव्रीहिसमासादिन्प्रत्ययनिष्पन्नः॥

अलोहितं, क्ली, (न लोहितं, नास्ति लोहितं यस्मात् इति वा।) रक्तपद्मं। इति रत्नमाला॥

अलौकिकः, त्रि, (लोके विदितः, लोक+ठक् ततोनञ्समासः।) लौकिकप्रत्यक्षाविषयः। अमानुषिकः। लोकातीतः। यथा,—
“अलौकिकत्वादमरः स्वकोषे
न यानि नामानि समुल्लिलेख।
विलोक्य तैरप्यधुना प्रचार-
मयं प्रयत्नः पुरुषोत्तमस्य”॥
इति त्रिकाण्डशेषद्वितीयश्लोकः॥
(“उपसंहर विश्वात्मन्नदोरूपमलौकिकम्”। इति भागवतपुराणम्।)



अल्पं, त्रि, (अल्+प।) किञ्चित्। तत्पर्य्यायः। ईषत् २ मनाक् ३ स्तोकं ४।
(“अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः”। इति मनुः।) क्षुल्लकं ५ मात्रं ६ दभ्रं ७ कृशं ८ तनुः ९ तनूः १० त्रुटिः ११ त्रुटी १२ मात्रा १३ लवः १४ लेशः १५ कणः १६ कणी १७ कणिका १८ अणुः १९ सूक्ष्मं २०। इत्यमरः॥ चुल्लं २१ क्षुल्लकं २२ खल्लं २३ कणा २४। इति शब्दरत्नावली। (अतिसामान्यः।
“अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम्”।
इति रघुवंशे। संक्षिप्तं। अदीर्घं।
“अनन्तपारं किल शब्दशास्त्रं,
स्वल्पं तथायुर्बहवश्च विघ्नाः”।
इति पञ्चतन्त्रम्।)

अल्पकः, पुं, (अल्प एव, अल्प+स्वार्थे कन्।) यवासवृक्षः। इति राजनिर्घण्टः॥ अस्य गुणाः॥
“यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठकासजित्॥
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः।
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा”॥
इति भावप्रकाशः।) (स्वल्पपरिमितः। किञ्चित्।
“यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत्”॥
इति मनुः।)

अल्पकेशी, स्त्री, (अल्पः केश इव पत्रमस्याः सा।) भूतकेशीवृक्षः। इति रत्नमाला॥

अल्पगन्धं, क्ली (अल्पो गन्धो यस्य तत्।) रक्तकैरवं। इति रत्नमाला॥

अल्पतनुः, त्रि, (अल्पा क्षुद्रापरिमाणा तनुर्यस्य।) खर्व्वः। दुर्ब्बलः। अल्पास्थियुक्तः। क्षुद्रदेहवान् तत्पर्य्यायः। पृश्निः २। इत्यमरः॥

अल्पपत्रः, पुं, (अल्पं पत्रं यस्य सः।) क्षुद्रपत्रतुलसी। इति रत्नमाला॥

अल्पपद्मं, क्ली, (अल्पमसम्पूर्णं पद्मं।) रक्तपद्मं। इति रत्नमाला॥

अल्पप्रमाणकः, पुं, (अल्पं प्रमाणमस्य, वा कन्।) चेलानं। इति रत्नमाला॥ चेलो चेला तरमूज इति ख्यातः। खरमूज इति केचित्।

अल्पमारिषः, पुं, (अल्पः क्षुद्रः मारिषः नटिया इति ख्यातः शाकः, कर्म्मधारयः।) शाकविशेषः। क्षुद्रनटिया इति ख्यातः। तत्पर्य्यायः तण्डुलीयः २। इत्यमरः॥ (तण्डुलीयशब्देऽस्य गुणा ज्ञेयाः।)

अल्पसरः, [स्] क्ली, (अल्पं क्षुद्रं सरः, कर्म्मधारयः।) क्षुद्रसरोवरः। डोबा गेड़े इति भाषा। तत्पर्य्यायः। वेशन्तः २ पल्वलं ३। इत्यमरः॥

अल्पायुः, [स्] पुं, (अल्पं संक्षिप्तं आयुर्जीवनकालो यस्य सः।) छागः। इति त्रिकाण्डशेषः॥ अचिरजीविते त्रि॥ (अदीर्घजीवी।
“दुराचारो हि पुरुषो लोके भवति निन्दितः।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च”।
इति मनुः।)

अल्पिष्ठः, त्रि, (अतिशयेन अल्पः, अल्प+इष्ठन्। अत्यल्पं। इत्यमरः॥ [अत्यल्पं। इत्यमरः॥

अल्पीयः, [स्] (अतिशयेन अल्पः, अल्प ईयसुन्।)

अल्लः, पुं, (अल्+क।)
अल्ला, स्त्री, (अल+क, स्त्रियां टाप्।) } परमेश्वरः।
एतन्नाम्ना यवना उपासन्ते। यथा। “ॐ अस्मल्लां इल्ले मित्रावरुणो दिव्यानि धत्ते। इलल्ले वरुणो राजा पुनर्ददुः। हयामि मित्रो इल्लां इल्लल्लेति इल्लाल्लां वरुणो मित्रो तेजकामाः। होतारमिन्द्रो होतारमिन्द्रो महासुरिन्द्राः। अल्लो ज्येष्ठं श्रेष्ठं परमं पूर्णं ब्रह्माणमल्लां अल्लोरसूर महमदरकं वरस्य अल्लो अल्लां आदल्लाबुकमेककं। अल्लां बुकं। निखातकं। अल्लो यज्ञेन हुतहुत्वा अल्ला सूर्य्यचन्द्रसर्व्वनक्षत्राः अल्लो ऋषीणां सर्व्वदिव्या इन्द्राय पूर्व्वं मायापरमन्त अन्तरिक्षाः। अल्लो पृथिव्या अन्तरिक्षं विश्वरूपं दिव्यानि धत्ते इलल्ले वरुणो राजा पुनर्ददुः। इल्लाकवर इल्लाकवर इल्लल्लेति इल्लाल्लाः इल्ला इल्लल्ला अनादिस्वरूपा अथर्व्वणी शाखां हूँ ह्रीं जनान् पशून् सिद्धान् जलचरान् अदृष्टं कुरु कुरु फट्। असुरसंहारिणीं हूँ अल्लो रसूरमहमदरकं वरस्य अल्लो अल्लां इल्लल्लेति इल्लल्लः”। इत्याथर्व्वणसूक्तं।

अल्ला, स्त्री, (अल्यते इत्यल्, क्विप्, अले भूषायै लाति गृह्णाति, ला+क।) नाम्नोक्तौ माता। इति वोपदेवः॥ (अथर्व्ववेदे अल्लाल्लेत्यादिख्यातो यवनोपास्यः परमेश्वरः।)

अव रक्षणे। (यथायथं सकं-अकं-च, भ्वादिं-परं-सेट्।) गतौ। कान्तौ। स्पृहायामिति यावत्। प्रीतौ। तृप्तौ। द्युतौ। शोभायामिति यावत्। श्रुतौ। आकर्णने इति यावत्। प्राप्तौ। श्लेषे। आलिङ्गने इति यावत्। अर्थने। याच्ञायामिति यावत्। वेशे। प्रवेशे इति यावत्। भावे। सत्तायामिति यावत्। वृद्धौ। गृहे। आदाने इति यावत्। वधे। सामर्थ्ये। अवगमे। कृतौ। करणे इति यावत्। कामे। इच्छोत्पादने इति यावत्। (इति वोपदेवीयकविकल्पद्रुमः तट्टीका च।) “अव रक्षे गतौ कान्तौ प्रीतौ तृप्तौ द्युतौ स्तुतौ। प्राप्तौ श्लेषेऽर्थने वेशे भागे वृद्धौ गृहे वधे। सामर्थ्येऽवगमे कामे कृतौ”। ऊनविंशतिरर्थाः। कान्तिरिच्छा। द्युतिः शोभा। काम इति आत्मलाभोत्पत्तेरिच्छोत्पादना इति भेदः। श्लेष आलिङ्गनं। सामर्थ्यं शक्तिः। रक्षणे प्रसिद्धोऽयं। प्रीतौ तु। “न मामवति सद्वीपा रत्नसूरपि मेदिनी”। इति रघुः॥ अन्यत्र विरलप्रयोगः। केचित्तु स्तुति-भाग-गृह-काम-कृतीर्न पठित्वा क्रिया-श्रवण-दहन-भावानाहुः। अवति। इति दुर्गादासः॥

अव, अ, (अव+अच्।) उपसर्गविशेषः। अस्यार्थः। निश्चयः। असाकल्यं। अनादरः। इति दुर्गादासः॥ आलम्बनं। विज्ञापनं। व्यापनं। शुद्धिः। अल्पं। परिभवः। नियोगः। पालनं। इति शब्दरत्नावली॥